**<u>ब्राह्मीलिपिः –</u>**

भारतवर्षे प्रचीनकालादेव अनेकशः लिपयः प्रचलिताः आसन् । तत्र ब्राह्मी - खरोष्ठी-सिन्धुघाटी लिपयश्च प्रमुखाः सन्ति। चीनीविश्वकोश: फा-वान-शू-लिन तिसृणां लिपीनाम् उल्लेखं करोति-1 ब्राह्मी, 2. कइअलू, 3. तनसकी च। अलबरूनी मन्यते ब्रह्मणा आविष्कृता लिपिः एव 'ब्राह्मी' इत्यभिधानेन अभिधीयते। या वामतः दक्षिणं प्रसरणशीला आसीत्। भारतीय-परम्परा तु प्राचीनलिपिषु तिसृणां लिपीनां अस्तित्वं स्वीकरोति-सैन्धव खरोष्ठी-ब्राह्मी च। विदुषां मतमस्ति यत् खरोष्ठी मूलत: विदेशीलिपिरस्ति, किन्तु सैन्धव-ब्राह्मी च भरतीया एव । ब्राह्मी खरोष्ठयोः ज्ञानं तु प्राचीनकालादेव आसीत् ।

वस्तुतः ब्राह्मीलिपिस्तु समुपलब्धलिपिषु प्राचीनतमा लिपि: अस्ति । यस्याः अनेकेषाम् एशियायी लिपीनां विकासः सञ्जातः । पुरातात्त्विकसर्वेक्षणैः ज्ञायते यत् ब्राह्मी लिपि: न केवलं मौर्यकाले, अपितु ई.पू.600 तमे संवत्सरेऽपि तमिलनाडुप्रान्ते श्रीलङ्कायां च प्रचलिता आसीत् । इयं लिपि: सैन्धवलिपे: (सरस्वतीलिपेः) प्रागपि भारतवर्षे प्रचलिता आसीदेव, अत्र नास्ति काचित् सन्देहावकाशः।

पालि-प्राकृतयोः अशोककालिकाः शिलालेखाः भगवतः बुद्धस्य उपदेशाश्च ब्राह्मीलिपिं समाश्रित्य अद्यापि सुरक्षिताः सन्ति। अस्या: लिपे: प्राचीनतम: प्रारूप: अद्यापि अशोकस्य शिलालेखेषु द्रष्टुं शक्यते ।

बौद्धग्रन्थे ललितविस्तरे सिद्धार्थस्य (भगवत: बुद्धस्य) अध्ययनप्रसङ्गे 64 लिपीनां या सूची समुपलभ्यते तस्याम् ब्राह्मीलिपेः अपि नाम-निर्देशं कृतमस्ति । समवायाङ्गसूत्रे जैनग्रन्थे 18 लिपीनां सूची प्रदत्ताऽस्ति, यस्यां प्रथमे स्थाने तु ब्राह्मीलिपेः एव नामाङ्कनमस्ति । जैनग्रन्थे प्रज्ञापनसूत्रे उल्लिखितमस्ति यदर्धमागधीभाषायाः आधार: ब्राह्मीलिपिः वर्तते ।

ब्राह्मीलिपेः उत्पत्तिविषयका: बहवः विचाराः सिद्धान्ताश्च अद्यपर्यन्तं प्रस्तुताः सन्ति। एतेषां निष्कर्षरूपेणेदं वक्तुं शक्यते यत्—

★ इयं ब्राह्मीलिपिः भारतवर्षे समुद्भूता वैदिककालस्य उपलब्धिरस्ति ।

★ ब्राह्मीलिपेः अक्षराणां लेखनं तेषाम् उच्चारणमनुसृत्य क्रियते स्म ।

★ अस्याः ब्राह्मीलिपेः 64 चिह्नानि आसन्।

★ब्राह्मीलिपौ स्वरेषु ह्रस्व-दीर्घप्रयोगः अत्र दरीदृश्यते।

★ अस्यां ब्राह्मीलिपौ अनुस्वारानुनासिकविसर्गाणां प्रयोगः भवति स्म ।

-- By Sanjoy Barman